सूयकदंतः। त्रिहिदन्तः। त्रिहिदन्तः। इत्यादि। काकुदस्यावस्थायां
लोपः। काकुदस्यांतलोपः स्यादवस्थायां। यो त्स्या यां। अजातक
कुत्। पूर्णकाकुत्। उद्विभ्यां काकुदस्य। आभ्यां परस्य काकुद
स्यांतलोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदंतालुः। पूर्णाद्वि त
भाषा। पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः।
सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं। दुर्हृद मित्रः।
अन्यत्र सहृदयः। दुर्हृदयः। उरःप्रभृतिभ्य कप्। एभ्यः कप्स्या
द्व्युरस्की हौ। पद्मत्ता तद्धितौ। व्यूढोरस्कः। सर्पिष्कः। इनः स्त्रियाम्

नावकारत प्रिय

व्या॰
प्र॰कौ॰

इन्नन्तात्कप्स्यात्स्त्रियाम्। बहुदण्डिका। बहुवाग्मिकासमान घृत
स्नेतिकप्। केण इति ह्रस्वः प्राप्तो न कपि। कप्परतो ह्रस्वो नस्या
त्। बहुलक्ष्मीकः। शेषाद्विभाषा। प्रागुक्तसमासान्ताद्वहु
व्रीहेः कप्वास्यात्। बहुदण्डी। बहुदण्डिकः। आपोन्यतरस्याम्।
कापिआवन्तस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः।
बहुमालः। ङ्यन्तावन्तस्यापि ह्रस्वो वेति केचित्। ऋतसोमपाकः।
ऋतसोमपकः॥ संज्ञायाम्॥ संज्ञायां बहुव्रीहेर्न कप्॥ ईयसश्च॥ ई स
यसन्ताद्बहुव्रीहेः कप्न स्यात्। बहवः श्रेयांसो यस्यासौ बहुश्रेयान्।

कल्पः श्रेयस्यो ऽस्य बहुश्रेयसी ७ हृषः । वंदितं भ्रातुः । भ्रा ब्रेतान्नक
स्यान्तरजायां लोभनो भ्राता यस्य सभ्राता । अन्यत्र मूर्धन्यालकः ।
सर्वनामसंख्ययोः प्राप्निपातो बहुव्रीहौ वाच्यः । सर्वश्वेतः । द्विशुक्लः
मिथोनयोः समासे संख्या पूर्वं निपतेत् । द्व्यन्यः । अल्पीयसो पूर्वं ।
द्विजाः । पंचषाः । वा प्रियस्य पूर्वं वा । गुडप्रियः । प्रियगुडः । गड्वादेः प
रा सप्तमी वाच्या । गडुः कंठे यस्य स गडुकंठः । अपि कंठे चैव तत्र कंठेग
डुः । बहेगडुः । गडुबहः । आकस्मसप्तम्याः प्रलुक्तात् निष्ठा । निष्ठान्तं प्राक्प्र
योज्यं बहुव्रीहौ । विशेषणत्वस्याविवक्षा । सर्वत्रादेन्तकवनान्तकः
जातिकालसुखादिभ्यः परा निष्ठा वाच्या । सक्तुजग्धी । सारंग

व्या॰ जग्धी । मांसदन्ता । दन्तवज्जाता । प्रजस्य पर्यायः । [illegible]

प्र॰ कौ॰ स्त्रकस्यो । स्यष्ठपात्तः । स्वदेषु चत्तः । दंडपाणिः । उपता

सिरित्यादि । प्रयोगवशात् द्वयोर्वाहिताग्न्यादिषु । क्वचि

त्वावाहूर्वस्यात् । आहिताग्निः । अग्न्याहितः । जातकुश्र

पुत्रजात इत्यादि । प्राकृतिगणोयं । सिमस्य जातपदा

र्थोपथत्वान्यपदार्थे देशः स्यात् समासविज्ञानो बहुव्री

हिः । लम्बकर्णः । इति बहुव्रीहिः ॥ वा र्थे द्वंद्वः । अनेकं सु

वंतं वार्थे नित्यं समस्यते । स द्वंद्वः स्यात् । समुच्चयान्वाचये

तरेतरयोगसमाहाराश्चार्थाः । तत्रेश्वरं गुरुं च भजस्व

त्रि प्रत्येकमेकक्रियासंबंधः समुच्चयः। वटो भिक्षाम
ट गां चानयेति क्रमेण क्रियाद्वयसंबंधोन्वाचयः।
मन्योन्यापेक्षयैकक्रियासंबंधः इतरेतरयोगः।
संहतिः समाहारः। समुच्चयान्वाचययोर्न समासो
सिन्नसामर्थ्यात्। द्वंद्वे घि। द्वंद्वे घिसंज्ञं पूर्वं स्यात्।
हरिश्च हरश्च हरिहरौ। इतरेतरयोगे प्रधानत्वा
द्द्वंद्वौ भवनेकत्राप्यनेकस्यानियमोऽनियमः
थे। हरिगुरुहराः हरिहरगुरवः। अजाद्यदन्तम्। अज
दिपदं तत्तद्द्वंद्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनि

व्या०
प्र०कौ
3

यमः। अश्वरथेन्द्राः। इन्द्रश्चरथश्च। अजाद्यदंतं तयोर्मि
थ्यः समासेऽदन्तं पूर्वं। इन्द्राग्नी इंद्रवायू इति परः। किं। अ
श्वावृषौ वृषाश्वौ वा। अल्पाच्तरम्। अत्यल्पाच्कं ह्रह
पूर्वं स्यात्। शिवकेशवौ। बहुष्वनियमः। शंखदुंदुभि
वीणाः। वीणाशंखदुंदुभयः। ऋतुभानां समाक्ष
राणां। आनुपूर्व्येण पूर्वनिपातः। हेमन्तशिशि
रवसंतौ। अश्विनीकृत्तिकारोहिण्यः। समानाक्षराणां
किं। ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्य
र्हितं च। तापसपर्वतौ। वर्णानामानुपूर्व्येण। ब्राह्मण

द्वित्रिपविंदम्ह्युः। भ्रातुर्ज्यायसहाववुधिष्ठिरार्जुनौ॥ संरव्या

याच्चाल्पीयस्याः। द्वौवदम्रावाद्वादशंयाराजदंतादिषु

परम्॥ एषुपूर्वप्रयोगार्हंपरंस्यात्॥ दलंत्रानांराजाराजदन्तः। वनस्याग्रेऽग्रेवणं। निपातनादलुक्॥ पोदा

पोर्मिप्यः समासेऽघ्यंतत्पूर्वं॥ इन्द्राग्नी॥ इन्द्रवायूतत्परः किं

प्ष्वाहृद्वौ॥ खवामेवा॥ अल्पाचतरम्॥ अस्यल्पाकं

द्वंद्वे पूर्वस्यात्॥ शिवकेपार्वी॥ बहुष्वनियमः॥ शंखदुं

दुभिवीणाः। वीणाशंखदुंदुभयः। ऋतुभानांसमा

नाक्षराणांच पूर्वंनिपातः। हेमन्तशिशि

आ॰ प्र॰ कौ॰

रवसंज्ञः । भरणी कृत्तिकारो हिरण्यः । समानानां तराणां किं श्रीमव

वसंतो । नहदर पूर्वा कृष्ठाका षं । अन्यहिंनव । तापसपर्वतो ।

वर्णमामानुपूर्व्येण । ब्राह्मणक्षेत्री । शाल क्षेत्री । धर्मक्षेत्री । का

मार्थी । धर्मादि कृष्णनियमइ व्यते । अर्थपूर्वो दोस्य यका

रो । अर्थधर्मविन्या दि जायापाज भावदं नावो वानि ।

पत्यो । पत्या । दंपती जंपती । जायापती । अनुवादे चरणानां

चरणानां । सो धर्व्वः अनुः तहूहं एकवत । अनुवादे गंम्यमा

ने २ औ कठकलापे अधर्म्यः कनतरनड़ समकं । अघर्य्यवेदम

स्याविपानं सो धर्व्वः अनुः तहं प्रकवत । अर्कात्पयमेधां ।

4

अध्वर्युक्रतुरिति किं । इषुवज्रौ । अनपुंसकमिति किं । रा
जसूयवाजपेये । अध्ययनतोविप्रकृष्टाख्यानाम् । अध्य
यनेन प्रत्यासन्नसंज्ञानां द्वंद्व एकवत्स्यात् । पदकक्रमकं । अ
ध्ययनतः इति किं । पितापुत्रौ । आसंनानाख्यानामि
ति किं । याज्ञिकवैयाकरणौ । द्वंद्वश्च प्राणितूर्यसेनांगा
नां । एषां द्वंद्व एकवत्स्यात् । पाणिपादं दंतोष्ठं । तूर्यांगे । मा
र्दंगिकवीणावादकं । सेनांगे । रथिकाश्वारोहं । समाहारस्यै
कत्वादेकत्वे सिद्धेपि इदं कैरणविषयविभागार्थं प्राण्यं
गादीनां समाहार एव द्वंद्वः । दधिपयादीनामितरेतरयो

व्या॰ णाएव। वृक्षमृगादीनामुभयत्वंनियम्यते। एतदर्थमिदंप्रक

प्र॰कौ॰ रणं। जातिरप्राणिनां। प्राणिवर्ज्जजातिवाचिनां द्वंद्व

एकवत्स्यात्। धानाशष्कुलि। प्राणिनांतु विट्शूद्राः

८ द्रव्यजातीयानामेकवद्भावः। ह। रूपरसौ। गमनाकुंच ने

नो२ व्याविवयायांत। यदाकचिद्दृष्टादौनिपतितानां

द्रव्यविशेषाणांविवक्षाभवतितदाजातित्वादृप्रयो

गेपिएकवद्भावोनभवति। बदरामलके। विशिष्टलिंगोन

दीदेशोऽग्रामाः। ५ ग्रामवर्ज्जनदीदेशवाचिनांभिन्नलिं

गानां द्वंद्व एकवत्स्यात्। गंगाशोणं। कुरुकुरुक्षेत्रं। भिन्न

लिंगस्कीं।गंगायजुने।ग्रामेतु।जं ववनशालज़किन्यो।
दद्भूजंनवः।दद्भूजंनलां हंह एकवाक्यान्तसकालिंदस्मृ।
क्षानकूलातनद्दूलंतवः।येषां विरोधः सप्त धर्मिकः।नि
त्यविरोधवाचिनां हंह एकवद्भावानत।सहितकुलतां
क्षमहिषां काकोलूकां वेकारानेपद्मुष्पंकुरानिति हं हे एक
कृद्भाव रवायमश्वश्च कुतीभिरद्गुणमालीरवसलां
भवहिकुशानांम्बरद्गुणां हंह एकेवत्।रजकानेतु
वायां वहहिः हेता मातृवांडालमृत्तयाः।गवाश्व प्र
स्तीतिवायपौत्रदारितान्येनानिकृतेकत्वानिसा

व्या॰
१॰ कौ॰

6

धनिष्ठः। गगवाश्वं दासीदासं गवेडकं कुब्जवामनं कुंजकिरातं
पुत्रपौत्रं श्वचांडालं स्त्रीकुमारं दासीमाणवकं उष्ट्रख
रं भगवती भागवातं शाटीप्रच्छदं कुटीकुटं श्ववसहतं
श्वभरीयं यकृन्मेदं मांसशोणितं दर्भशरं दर्भपू
तिकं अर्जुनपुरुषं तृणोलपमित्यादि। विभाषा वृक्ष
मृगतृण धान्यव्यंजनपशु शकुन्यश्ववडवपूर्वापराधरो
त्तराणां एषां द्वंद्वः एकवत्स्यात् वृक्षादौ विशेषाणामेव
ग्रहणं प्लक्षन्यग्रोधं प्लक्षन्यग्रोधौ रुरुपृषतं कुशकाशं
व्रीहियवं दधिघृतं गोमहिषमेडकवकं। अश्ववडवं

र्वापरं अधरोत्तरं पदोदधिचृते गोमहिषो फलसेनां
गावनस्पति मृगपक्षा कुट्टिद्दद्रजंतुधान्यतराणांवद्वप्रकृति
रेपद्दइएकवत् बदराणिचामलकानिबदरामलकम्
हि प्रकृतौनुबदरामलके राप्रिकाप्रोरोहावित्यादि
विप्रतिषिद्धंचानि विकरणवाधि अद्रव्यवाचिनांवि
प्रतिषिद्धार्थानांद्दइएकवेद्दास्यात् शीतोसे शी
तोष्णं विरुद्धाकिं कामक्रोधौ नेह द्रव्येन शीतोष्
णोदके नदधिपयआदीनि एतानिनैकवतस्युः दधिप
यसी २ धगावर्हियीनिपातनादी र्घः ऋत्वक्सामे वाङ्मनसी

व्या·
प्र·कौ
7

...के सौत्तावत्तेचाद्व्यपरिमाणावगमे नैकवद्भावः
द्वन्द्वो ष्ठाः आनङ् ऋतो द्वन्द्वे विद्यायोनिसंबंधवा
चिनामृदन्तानां द्वन्द्वे पूर्वपदस्यानङ् स्यात् होतापोता
रौ पुत्रेऽन्यतरस्याम् पितापुत्रौ मातापुत्रौ देवताद्वन्द्वे च
इह पूर्वपदस्यानङ् मित्रावरुणौ उभयत्र वायोः प्रतिषे
धः अग्निवायू वाय्वग्नी एकहविर्भागित्वं द्वन्द्वस्य ब्रह्मप्र
जापतीत्यादावप्रसिद्धत्वान्नानङ् ईदग्नेः सोमवरुणयोः
अनयोर्द्वन्द्वे अग्नेरीकारादेशः स्यात् अग्नेः स्तुत्स्तोम
सोमाः ॥ अग्नेः परस्य षः स्यात् अग्निष्टुत् अग्निष्टो

स्र: अग्नीषोमौ अग्नेरीषोमन्तस्ये सोमोमाणवको अग्न
नीवरुणौ इद्धद्धौ वृद्धौपरपदे अग्नेरिदादेशः स्यात् आ
ग्निमारुतं कर्म आग्निवारुणीमनड्वाहीम् विष्णोन देवा
नाहंदेवतस्यानङ् आग्नावैष्णवंचरुं दिवोद्यावा द्यावाभूमि
भीउज्जपन मातरपितरावुदीचां मातरपितरौ उदीचां कि
मातापितरौ द्वंद्वाच्चुदषहान्तात्समाहारे चवर्गान्ताद्दषहां
ताद्द्वन्द्वस्यात्समाहारे वाक्त्वचं शमीदृषदं श्रीस्रजं वा
कत्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ वृक्षौ इ

व्या० प्र० कौ० ४

तल्लक्षणश्चेदेव विशेषः यूनासहवचने गोत्रं शिष्य
ते गोत्रयुवप्रत्ययकृतमेव वैरूप्यं चेत्तयोः गार्ग्यश्च गा
र्ग्यायणश्च गार्ग्यौ वृद्धः किं गर्गगार्ग्यायणौ यूना
किं गार्ग्यगर्गौ तल्लक्षणः किं वार्ग्यवात्स्यायनौ वृ
द्धा यूनासहवचने स्त्रीवृद्धा शिष्यते सा च पुंवत् तल्ल
क्षणमेव वैरूप्यं चेत् गार्गी च गार्ग्यायणश्च गार्ग्यौ पुमान् स्त्रि
या स्त्रियासहोक्तौ पुमान् शिष्यते स्त्रीत्वलक्षणश्चेदेव
विशेषः। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ तल्लक्षणः किं

कुकुटमयूर्यौ भ्रातृपुत्रौ स्वसृदुहितृभ्यां स्वस्रा सहोक्तौ भ्राता
दुहित्रा सहोक्तौ पुत्रः शिष्यते भ्राता च स्वसा च भ्रातरौ दुहिता
च पुत्रश्च पुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां
अक्लीबेन सहोक्तौ क्लीबं वा शिष्यते एकत्वमस्य वा लिंगविशे
षश्चेत् शुक्लः कंबलः। शुक्ला द्विपटी शुक्लं वस्त्रं तदिदं
शुक्लं वस्त्रं तानीमानि शुक्लानि। पिता मात्रा मात्रा सहोक्तौ पि
ता शिष्यते पिता च माता च पितरौ मातापितरौ श्वशुरः
श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरः शिष्यते श्वश्रूश्च श्वशुरश्च
श्वश्वशुरौ श्वश्रूश्वशुरौ वा त्यदादीनि सर्वैर्नित्यं सर्वैः

व्या· सहोक्तौ त्यदादीनि शिष्यंते सदेवदत्तश्चतौ त्यदादीनामेष्यः स्व
प्र· कौ· होक्तौ परं तच्छिष्यते इति वाच्यं स च पश्चयो ग्राम्या पशुसंघे
ष्वतरुणेष्वस्त्री ग्राम्यपशुसंघेषु स्त्री शिष्यते न तरुणेषु गा
९ व इमाः अजा इमाः ग्राम्येति किं रुरव इमे पशुषु किं ब्राह्मण
इमे संघेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकश
फे स्त्रीति वाच्यं नेह अश्वा इमे इति हिंद्वः चरकूरछूपप्यामानदे
स्पात एषाम प्रत्ययः समासांताः धरस्त्व अनदो अद्भवः अड्
ही: पुंसि चेति पुंस्त्वं अनच बहुवाव चेत पर्थैव नेह अनकाम
बहुकर्त्तृकं विस्तरं विमलापं सरः प्राप्तरूपसर्गेभ्योप इति

एभ्योऽपोऽकारस्येत् द्विर्गता आपो ऽस्मिन्निति द्वीपं अन्तरीपं अ
पः प्रतिप्रतीपं क्वचिन्न समापो देवयजनं अवक्लान्नेष्यत इति के
चित् प्रापं अवापं ऊदनोर्देशे अनोप्यस्यो योऽकारस्येत्स्या
द्देशे अद्भिरनुगता अनूपो देशः राजधरं अदेत्रमदधूः
दृढधूरथः सखिपथः रम्यपथो देशः महापथः दक्षिणा
पथः चतुष्पथं उपपथं अच्प्रत्ययान्ववपूर्वात्सामलोम्नः एभ्यः
पराभ्यां सामलोमभ्याम् अच्प्रत्ययः स्यात्समासे प्रतिसामं अ
नुसामं अवसामं एवं प्रतिलोमादि कृष्णोदक्पाण्डुसंख्यापूर्वा
या भूमेरजिष्यते कृष्णभूमः उदग्भूमः पाण्डुभूमः द्विभूमः

व्या॰ त्रिभूमः प्रासादः संख्याया नदीगोदावरीभ्यां च पञ्चनदं स
प्र॰कौ॰ प्तगोदावरं अन्यत्रापीष्यते पद्मनाभः ऊर्णनाभः दीर्घ
रात्रा वर्षारात्रः अक्ष्णोऽदर्शनात् अच् चतुःपर्य्यायाद्दैदृशा
१४ ऽवस्यात्समासे गवामक्षीवगवाक्षं वक्तुर्षितविप्राप्तिः
अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मन
ग साक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दि
वसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजा
तोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः वसन्नमीतियोगविभा
गात्समासः अचतुरेति सूत्रेण जज्ञाः पञ्चविंशतिर्निपा

त्वं ते अग्राद्यास्त्वयो बहुव्रीहयः अविद्यमानानि वस्त्वार्यस्य अ
चतुरः विचतुरः सुचतुरः सुपाभ्यां चतुरोऽजिष्यते त्रिचतु
राः उपचतुराः ततएकादशाद्वंद्वाः स्त्रीपुंसौ धेन्वनडुहौ ऋ
क्सामे वाङ्मनसे अक्षिभ्रुवं दारगवं ऊर्वष्ठीवं निपातना
दिलोपः पदष्ठीवं निपातनात्सद्भावः नक्तंदिवं रात्रिंदिवं
अहर्दिवं अहन्यहनीत्यर्थः रजसासकलं त्वीतिसाकलोऽ
व्ययीभावः सरजसं निश्चितं श्रेयो निःश्रेयसमितिकर्मधा
रयः पुरुषस्यायुषपुरुषायुषमिति तत्पुरुषः ततोद्विगु
द्यायुषं त्र्यायुषं ततोद्वंद्वः ऋग्यजुषं ततस्त्वयंःकर्मधा

आ॰
प्र॰ कौ॰
॥
वसी

रथाः। ज्ञातोक्षः महोक्षः। वृद्धोक्षः। श्वनः समीपमुपश्वनं। गोष्ठश्वा
गोष्ठश्वः। ब्रह्महस्तिभ्यांवर्चसः। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्य
राजभ्यांच। पल्यवर्चसं। राजवर्चसं। अवसमंधेभ्यस्तमसः।
एभ्यस्तमसोऽवस्यात्। अवतमसं। संतमसं। अंधतमसं।
श्वसोवसीयसः। श्वोवसीयसं। श्वः श्रेयसं। पुमान्स्त्रीवे
नौ। अन्ववतप्तात्‌रहसः। अनुरहसं। अवरहसं। प्रतेरुरसः स
प्तमीस्थात्। प्रतेः परात्सप्तमीस्थादुरसोवस्यात्। उरसि प्र
तिवर्ततेप्रत्युरसं। विभक्त्यर्थेव्ययीभावः। अनुगवमायामे। एत
न्निपात्यतेदीर्घत्वे। अनुगवंयानं। दीर्घमित्यर्थः। यस्यवा।

या भवति समासः। उपसर्गा दध्वनः। प्रगतो ध्वानं प्राध्वो रथः।
न पूजनात्। पूजार्थेभ्यः समासांत प्रत्यया न स्युः।
सुराजा। अतिराजा। स्वतिभ्यामेवेति नेह। परमराजा। पूज
यां किं। गामतिक्रांतो ऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरिति न
निषेधः। सुसक्थः। स्वक्षः। किमः क्षेपे। क्षेपार्थात्किमः प
ते
रस्य समासांतो न स्यात्। किंराजा। नञस्तत्पुरुषात्। नञ
स्तत्पुरुषात्समासांतो न स्यात्। असखा। अराजा। नञ्त
त्पुरुषात् किं। अनृचो माणवकः। अधुरं। पथो विभाषा।
नञः परो यः पथिन् तस्माद्वा समासांतः। अपथं। अपथाः। नञ्

व्या०
प्र० कौ

12

कृष्णादित्येवा । अपपथ्योदेशः । अपथंवर्त्तते । लुंपद्वप्रथमः । कृ
त्यौ तुंकाममनसोरपि । समोवाहिततनयोर्मांसस्यपचियुड्घ
ञोः । अवश्यसेव्यः । गंतुकामः । गंतुमनाः । संहितः । सहितः
संततः । सततः । मांस्पचनं । मांसस्यपचनं । मांसस्यपाकः ।
मांस्पाकः । काममनसोः समोन्तलोपठंतिकेचित् । सकामः ।
समनाः । उदकस्योदः संज्ञायां । उदकस्योदादेशः स्यात्सं
ज्ञायामुत्तरपदे । उदमेघः । उदवाहः । उत्तरपदस्यापि । उदमे
घोनामयस्यस उदमेघिःपुत्रः । लोहितोदः । क्षीरोदः । पेषंवा
सवाहनधिषुवा उदपेषंपिनष्टि । रामलंतः । उदवासः ।

उदकाहृतः। उदधिः। एकहलादौपूरयितव्येन्यतरस्यां। असंयुक्त
हलादौपरेउदकस्योदादेशःस्याद्वा। उदकुंभः। उदपात्रं। उद
ककुंभः। एकेतिकिं। उदकस्थाली। पूरयितव्येतिकिं। उदकपर्वतः। मं
थौदनसंक्तुबिंदुवज्रभारहारवीवधगाहेषुच। एषूदकस्यउ
दादेशोवा। उदमंथः। उदकमंथः। इत्यादि। पादस्यपदाज्या
तिगोपहतेषु। एषुपरेषुपादस्यपद्भावःस्यात्। पदाजिः।
पदातिः। पद्गः। पदोपहतः। इकोह्रस्वोङ्योगालवस्य। ङ्यंत
स्येकोह्रस्वोवा। ग्रामणिपुत्रः। ग्रामणीपुत्रः। इयङुवङ्व्यया
नांप्रतिषेधः। श्रीमतैः। स्वयंभूपुत्रः। भ्रूभंगः। भ्रुकुंसौभावः।

व्या• प्र•कौ• रूप 1 13 एकह्री २

अन्तस्यानुगार्गीपुत्रः। ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरु
षे। ष्यङः संप्रसारणं स्यात्पुत्रपत्योस्तत्पुरुषे परतः
पूर्वपरत्वं। संप्रसारणस्य, संप्रसारणान्तस्य दीर्घः स्यात्।
उत्तरपदे। कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। व्यवस्थि
त विभाषया ह्रस्वो न। एकतद्धिते च। एकस्य ह्रस्वः स्यात्तद्धि
ते। उत्तरपदे परे च। एकस्याभावः। एकता। ओपोः संज्ञा छंद
सोर्बहुलं। कुमारी रेवतीमित्रः। ३ ष्टके ष्टीका माला नां चित
तूलभारिषु। इष्टकादीनां चितादिषु यथाक्रमं ह्रस्वः स्या
त्। इष्टकचितं। इषीकतूलं। मालभारी। नद तस्यायीषिः

त्रि

प्रकोस्पकादितं। ज्योतिर्जनपदराजितभिरामगोत्ररूपस्थान

वर्णवयोवचनवंधुभु। एषुपरेषुसमानस्यसः स्यात्।

समानंज्योतिर्यस्यसज्योतिः। इत्यादि। पिंडग्रंथलोहि

तकादिवेण्णीपत्नीपदेष्वपीतिकेचित्। सपिंडइत्यादि।

चरणेब्रह्मचारिणि ब्रह्मचारिणिपरपदेसमानस्यसः

स्यात्। प्रतोचरणेभ्यस्सब्रह्मचारी। तीर्थेये। य प्रत्य

याद्भ्रतीर्थेप्रागवत्। सतीर्थ्यः। विभाषोदरे। यान्ते उद

रेप्रागवत्। सोदर्यः। समानोदर्यः। रूपनामगोत्रस्थान

वर्णवयोवचनधर्मजातीयेष्वभवतीतिकेचित्। सरूपः। स

व्या. मानरूपकृत्यादि । दृग्दृशवतुषु । एषु समानस्य सः स्यात् ।

प्र.कौ. स दृक् । सदृशः । दृशेश्चेष्यते । सदृक्षः । वतुरुत्तरार्थः ।

इदंकिमोरीश्की । इदम ईश् । किमः कीश् स्यात् । दृग्द-

शवतुषु । ईदृक् । ईदृशः । कीदृक् । कीदृशः । दृशेश्चेति

कीदृक्षः । वतुप् इदंकिंभ्यां वतो घः । आ सर्वनाम्नः । एषु स-

र्वनाम्न आकारोऽन्तादेशः स्यात् । तादृक् । तादृशः । ता-

दृक्षः । दीर्घः । मावानिभ्रमसदृक् । मसदृशः । मसदृक्षः ।

विशष्टदेववचोऽस्मदेत्युष्मदोर्मपर्यन्तयोः सर्वना-

म्नमदेशः स्यादेशः स्यात् प्रत्ययोत्तरपदे च परे । विवक्ष

ङ् । देवद्र्यङ् । विष्वद्र्यङ् । सध्र्यङ् । समुञ्चं चाग्निसदद्र्यङ्

14

अदसो आदेशस्य अदसो सेरित्रिनुभावश्च्यते। परत्र के
विदिच्छंति केचिदिच्छंति एवंतः उभयोः केचिदिच्छंति केचि
न्नेच्छंति चोभयोः । अदमुयङ् । अविशेषः उभयत्रापीत्यपरे
अदुमुयङ् । आदावित्यन्ये अमुमुङ् । अत्यर्थोऽकिमः । वि म
ष्वंगचः । समः सामि । अप्रत्यये लेचंचतौ परे समः सामि
रादेशः स्यात् । सम्यङ् । सहस्य सध्रि । सध्र्यङ् । अवश्य
न्तृतीयास्सप्तम्योरन्यस्य दुगागमोऽपि वा स्यात् स्थितोत्सुकोति
कारकरागच्छेषु । अन्यपरस्य दुगागमः स्यात् आशीरा
दिषु परेषु । अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्य

सा. दास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यत्कारकः। अन्य
प्र. कौ. द्रागः। अन्यदीयं। अषष्ठ्यतृतीयास्थस्येति किम्। अन्य
स्य अन्येन वाशीः। अन्याशीः। कारकछयोरि
त्येव। अन्यस्य कारकः। अन्यत्कारकः। अन्यस्येदमन्यदी
यं। गहादित्वाच्छः। अर्थे विभाषा। अन्यदर्थं। अन्यार्थं। कोः
कत्तत्पुरुषेऽचि। कु इत्यस्य कदादेशः स्यात्। कदन्नं
तत्पुरुषे किम्। कुष्ठो राजा। अचीत्येव। कुपुरुषः। त्रौ च।
कुत्सितास्त्रयः कत्त्रयः। रथवदयोश्च। कद्रथः। कद्वदः। तृ
णे च जातौ। कत्तृणं। जातौ किम्। कुत्सितानि तृणानि कु

त्वत्॥ का पथ्यक्षयोः॥ कोः का देशः स्यात्पथ्यक्षयोः।
कापथः। काक्षः। कुपथोपीति केचित्। ईषदर्थे च। ईषज्ज-
लं। काजलं। विभाषा पुरुषे। कुपुरुषः। कापुरुषः। कवं चो-
ष्णे। ईषत्‌उष्णं ईषत्कोष्णं कवोष्णं कदुष्णं। कारात्त्कद्रुसं। अपू-
पीति केचित्। कवाग्निः। कदग्निः। काग्निः॥ पृषोदरादी-
नि यथोपदिष्टं॥ एतानि यथोपादिष्टान्येतसाधूनि॥ पृ-
षदुदरं पृषोदरं। भवेद्वर्णागमाद्धंसः। सिंहो वर्णविपर्यया-
त्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं। महाभा-
ष्यप्रायेनरोति इतिमध्यस्वरः। रोतेरचिवि हिलोपः महीपा दृस्य

व्या॰ प्र॰ कौ॰

16

मयूरभावः। आकृतिगणोयं। नहिवृतिवृषिव्यधिरुचि
सहितनिषु क्वौ। क्विबन्तेष्वेषु परेषु पूर्वस्य दीर्घः स्यात्। उ
पानत्। नीवृत्। प्रावृट्। मर्म्माविधृत्। नीरुक्। अभीरुक्। ऋतीषट्
परीणत्। वनगिर्योः संज्ञायां कोटरकिंशुलकादीनां
कोटरादीनां वने परे किंशुलकादीनां गिरौ परे दीर्घः स्य
त्संज्ञायां। किंशुलकागिरिः। वनं पुरगामिश्रकासिध्र
काशारिकाकोटराग्रेभ्यः। एभ्यो वनस्य णत्वं स्यात्सं
ज्ञायां। पुरगावणं। कोटरावणं। अग्रेवणं। इत्यादि। ए
भ्यः किं। कुबेरवनं। उपसर्गस्य घञ्यमनुष्ये बहुलं।

प्रादेवं डलं दीर्घं स्यान्मन्त्रे परे परिहासः । परीहासः । अम
नुष्ये किं । निषादः । मुनोवंनदक्षाकरणौ द्वराहनु
ष पदे पु दीर्घो वा स्यः । वादन्तः । स्वा पदमित्या
दिष्वाविरन्त्रः । श्यारेवतु लदाय्रका पूर्वरवादिरपीपरद
भ्यो संज्ञायामर्थि मतौ वहुचोतजिरादीनां व
हुचो दीर्घः स्यान्मतौ परे संज्ञायां । अमरावती । भ्र
रावती । शरादीनां वा एषां दीर्घः मतौ विषये । शरा
वती शरवावतीरष्यो वतस्य णत्वं स्यात् राप्रवणं
एवं निर्वणादि विभाषौषधि वनस्पतिभ्यः । ०

व्या. द्वाविंशः परस्य नस्य नस्य णत्वं स्यात् ॥ दूर्वावणं ।
१-कौ. मूर्वावणं । शिरीषवणं । बदरीवणं । पदे । दूर्वावन
मित्यादि । अद्रिरेभ्यः खानेः । देवदारुवनं । इरि
17 कादिभ्यः । इरिकावनं । मिरिकावनं । वा हलन्ता
हितान पदस्यैवितडु च्यते न ह्याचितिस्यिका
त्रिप्रित्रान्तस्य वा । हलन्तकारस्य णत्वं स्यात् ॥ इक्षु
वाहणं । वाहणं । प्रातिपदे ॥ पूर्वपदस्यात् ॥
विद्योपरस्य प्रातिपदिकस्य नकारस्य णत्वं स्यात् ॥ दिवे
गम्भोदीर्घपारणः । उशीनरः । खेदापारणः । प्राख्याः

वाभावकरणयोः।प्राग्युक्तानिमित्तात्परस्यभा
वेकरणेचनिष्पन्नस्यपानस्यवाणत्वंस्यात्ता
दीरयाणं।दीरयाने।करणेदीरयाणं।दीरया
नंपात्रां।गिरिनद्यादीनांवा।गिरिणदीचक्रण
दंचक्रणदी।पदेगिरिनदीत्यादि।प्रातिपदिका
न्तनुम्विभक्तिषुच।एवंपदस्यानिमित्तात्परस्य
एकाश्रितस्यतस्यणत्वंवास्यात्।प्रातिपदिका
न्तेमाषवापिणौ।उभिव्रीहिवापाणि।विभक्तौ
माषवापेण।माषवापेनेत्यादि।समासेसवि

व्या॰
प्र॰कौ॰

18

प्रातिपदिकान्तस्यैवेष्यते। नेह। माषवापाणां वापि
नी माषवापिनौ समासे स्यादेव माषवापाव
पतीति माषवापिणौ। माषवापिनौ।१४। वा
दैर्णं। रम्यपत्ता। रम्यपर्वेन। रम्याह्वा। एकाजु
त्तरपदे णः।१२। एतत्रिय हर्याणि यत्राप्ये वृत्र
हणौ। हरिमानयतीति हरिमाणौ। क्षुम्नादी
नपोलिनाक्षित्रैतोक्षीरपेण। स्वाविरेण। कुम
ति च। कवर्गवत्युत्तरपदे च प्राग्वत्। हरिकामि
णौ। हरिकामिणी। श्रीकामिणी। श्रीकामेण

गर्गाणां सगिनी। गर्गी भगिनी। पदव्यवायेपि। पदेन व्य
वधानेपि णत्वं न स्यात्। माषकुंभवापेन। वृत्तुरंगयो
र्णत्वं न स्यात्। तद्धित इति वाच्यं। आर्द्रगोमयेण। शुष्कगो
मयेण। पारस्करप्रभृतीनि च संज्ञायां एतानि सस्
ड्ना निपात्यंते। तानि। पारस्करः। किष्किंधा। प्राय
श्चित्तं। वनस्पतिः। इत्यादि। अंत्योन्यपरस्परं। अग्रा
कृतिगणोयं। अधः शिरसी पदे। अस्मद्भ्रत्र पदयो
स्तयोर्विसर्जनीयस्य सः स्यात् पदशब्दे परं। समासे
अधस्पदं। शिरस्पदं। अन्यत्राधिरसः पदं। अन्यत्र

स्या॰ पद इति किं। परमदिवः पदं। इति समासांताः॥ पंचम्याः स्तो
प्र॰कौ॰ कादिभ्यः। स्तोकादिभ्यः परस्याः पंचम्या अलुक् उ
त्तरपदे। समासे प्राप्तो लुग् निषिध्यते। स्तोकान्मु
19 क्तः। एवं अंतिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे किं
निष्क्रांतः स्तोकात् निःस्तोकः। ओजः सहोंभस्तमसस्तृ
तीयायाः। ओजस् सहस् अंभस् तमस् एभ्यस्तृ
तीयाया अलुक् स्यात्। ओजसाकृतं।
मनसः संज्ञायां। मनसादत्ता। संज्ञायां किं।
मनोदत्ता। आज्ञायिनि च। मनसस्तृतीयाया अ

लुकस्मात् आज्ञायिन्युत्तरपदे परे। मनसाज्ञायितुं शीलं
यस्य स मनसाज्ञायी। आत्मनश्च पूरणे। पूरणार्थे
परपदे आत्मनस्तृतीयाया अलुक्। अन्तेत्तीयेति यो
गविभागात्समासः। आत्मनापञ्चमः। आत्मनाष
ष्ठः। प्रकृत्यादिभ्यश्च। प्रकृत्याभिरूपः। वैयाकरणा
ख्यायां चतुर्थ्याः। आत्मनश्च चतुर्थ्या अलुक्स्या
त् वैयाकरणाख्यायां। आत्मनेपदं। आत्मनेभा
षा अलुग्विधिसामर्थ्यात् चतुर्थीसमासः। परस्म

त्वा

वा॰ वा परस्मैपदं परस्मैभाषा। हलदन्तात्सप्तम्याः संज्ञायाम्।
प्र॰कौ॰ हलन्ताददन्ताच्च सप्तम्या अलुक् स्यात्संज्ञायाम्। गवियुधिभ्यां स्थिरः।
आभ्यां स्थिरस्य सकारस्य षः स्यात्। गविष्ठिरः। यु
20 धिष्ठिरः। त्वचिसारः। अदन्तात्। अरण्येतिलकाः। अ
त्र संज्ञायां विषये सप्तमी सुपा नित्यं समस्यते। अ
लुक्सप्तमीसमासः। हृद्द्युभ्यां ङेः। हृदिस्पृक्। दिविस्पृक्।
मध्याद्गुरौ। अत्रापि प्राग्वत्। मध्येगुरुः। अन्ताच्च।
अन्तेगुरुः। अमूर्धमस्तकात्स्वाङ्गादकामे। स्वाङ्गात्

अस्याअलुकस्यात्। कंठेकालः। उरसिलोमः। उदरे
मणिः। अमूर्द्धमस्तकात्। शिरः। मस्तकाशि
खः। कामेकिंगुरुखेकामे। पस्यमुरववकामः। वि
शेषविभाषा। वंधेपरपदेपरेसप्तम्याअलुका। वे
के वंधः। चक्रवंधः। हस्तेवंधः। हस्तवंधः। सिद्ध
शुष्कप वंधेष्व। नतूभ्वेहालिवकुलं। कालिपरप
देसप्तम्याअलुग्वकुलं। नगुरुहषेरिसिवेरमः। क
र्णेजपः। अवनस्यात्कुरुचरः। उपपदमतिङि
ति समासः। प्रावृट्शरत्कालदिवीजाजेपरपदे

सा॰
प्र॰ कौ

2)

सप्तम्या अलुक्वा । प्रावृषिजः । शारदिजः । कालेजः ।
दिविजः । विभाषा वर्षक्षरशरवरात् ॥ ६ ॥ एभ्यो
जे परे सप्तम्या अलुग्वा । वर्षेजः । वर्षजः । इत्यादि । घका
लतनेषु कालनाम्नः ॥ एसंहेकाल प्राह्णेन्नलेव
कालनाम्नः सप्तम्या अलुग्वा । पूर्वाह्णेतरा । पू
र्वाह्णेकाले । पूर्वाह्णेतनः । पदेपूर्वाह्णतरः इत्यादि
घायादि । हलदन्तादित्येवा सवासिद्धेकालात् ।
एषु परेष्वकालवाचिनः सप्तम्या अलुग्वा ।
विष्टपः । ग्रामेवासः । ग्रामेवासी पदेत्वसाप

इत्यादि।हलदत्वादिस्येवा।नेहा।भूमिशय:।क्रा
काला।किं।इन्दीवरशय:।मपाया।यानि।उ मालिभ्यां।कु
कुपानि:।अप्स:।अप्सुमानि:।प्र प्राग्वाग्यो
यो।अग्राक्रोशेग मामातेप प्रागमलकस्यात।।
वैरस्यकुलं।निदायां।किं।ब्राह्मणकुलं।वार्गिद
वशपक्षेणु।किंदंड हरेणु।वा।वायु।किं।दिशो।इंद्र:
पशुपता।हर:।अनुरव्यायमा:।देवानांप्रिय:।
निचपर वै।धोपणु।छिलां।गलेशु।स्तुत:।स्तुत:।यो
ष:।स्तुत:।पृथाप्सु।गोलांग्रूल:।पुत्रेस्य नरस्यो

व्या. प्र-कौ.

22

पुत्रे परे अलुग्वा निंदायां। दास्याःपुत्रः। दासीपुत्रः॥ निंद
या किम्। ब्राह्मणीपुत्रः। ऋतो विद्यायोनिसंबंधेभ्यः।
विद्यासंबंधयोनिसंबंधवाचिन ऋदंतात् षष्ठ्या अ
लुक् स्यात्॥ होतुरन्तेवासी। होतुःपुत्रः। विभाषा स्वसृ
पत्योः। स्वसृपत्योः परयोः ऋदंतात् षष्ठ्या अलुग्वा स्या
त्। ननांदृपतिः। ननांदुःपतिः। मातृपितृभ्यां स्वसा।
भ्यां परस्य स्वसृः सकारस्य षः स्यात् समासे।
मातृष्वसा। पितृष्वसा। अलुग्वादौ। मातृपितृभ्या
मन्यतरस्यां। षष्ठ्यंताभ्यां परस्य स्वसृः सकारस्य षः

स्याद्वा समासे मातृष्वसा मातुः ष्वसा पितृः ष्वसा पि-
तुः ष्वसा असमासे तु मातुः स्वसेत्येव नित्यं ॥ इति
समासप्रक्रिया ॥ उपगार्ग्यपत्यमिति विग्रहे प्राग्दी-
व्यतोऽण् तेन दीव्यतीत्यतः प्राग्यादितः परं वक्ष्य-
माणः प्रत्ययः स्यादिति शेषं। तस्यापत्यं। तस्ये-
ति षष्ठीसमर्थादपत्येऽर्थे यथायथमणादयः
स्युः समर्थानां प्रथमाद्वा यदितः परं वक्ष्यन्ते प्रत्य-
याः इति यावत्समर्थानां मध्ये प्रथमान्ताद्विशेषाद्वा
स्यादिति शेषः। इति वक्ष्यमाणादण्। तद्धितेष्वचामादेः

व्या॰
प्र॰ कौ॰
23

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात्। विभ
क्तिलोपः। ओर्गुणः। अवादेशः। तद्धितांतत्वात्सुबु
त्पत्तिः। आदिवृद्धिरंत्योपधावृद्धिं बाधते। औपगवः।
वाग्रहणाद्वाक्यमपि। उपगोरपत्यमिति। अन्यत
रस्मिन्नित्यनुवृत्तेः समासोपि। उपग्वपत्यमित्यपि।
समर्थग्रहणान्नेह वाक्यमपि। उपगोरपत्यमिति।
श्र यत्तस्य। कम्बलमुपगोरपत्यं देवदत्तस्य। टिड्ढाणञिति ङी
प्। औपगवी। अपत्यं पौत्रप्रभृतिगोत्रं। [illegible] चापत्
गोत्रसंज्ञं स्यात्। एको गोत्रे। गोत्रे एक एव प्रत्ययः

स्यादानंतरापत्यवत्तुल्यं। यद्वा मूलप्रकृतेरेव प्रत्ययो
त्पत्तिः। उपगोः पौत्रादिरौपगवः। जीवति तु वंश्ये।
युवा। वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्था
दि तद्युवसंज्ञं स्यात्। अनंतरगोत्रसंज्ञं। गोत्राद्यून्यस्त्रियां।
यून्यपत्ये विवक्षिते गोत्रप्रत्ययांतादेव प्रत्ययः स्या प्र
न्मूलप्रकृत्यन्तरं तु वक्ष्यते। स्त्रियां युवसंज्ञादि
औपगवस्यापत्यं युवेति विग्रहे। अत इञ्। अदन्ता
त्षष्ठीसमर्थादिञ् स्यादपत्ये। अणोऽपवादः। औप
गविर्युवा। स्त्रियां तु गोत्रप्रत्यय एव चतुर्थ्यादौ
औपगवी स्त्री। इत्यानंतरापत्यगोत्रापत्ययुवादादिः।

व्या० युवापत्ये ॥ यञिञोश्च ॥ गोत्रे यौ यञिञौ तदन्ताद्यूनि फक् स्या
प्र०कौ० त् ॥ किति च ॥ किति तद्धिते परे अचामादेरचो वृद्धिः स्यात् ॥ फस्या
यनादेशः ॥ दाक्षायणः ॥ दाक्षायणौ ॥ दाक्षायणाः ॥ गर्गस्यान
124 न्तरापत्यं गार्गिः ॥ गार्ग्यः ॥ गार्ग्यायणः ॥ गोत्रापत्ये ॥ यञ् प्रा ॥ गर्गा
दिभ्यो यञ् ॥ गर्गादिभ्यो गोत्रापत्ये यञ् स्यात् ॥ गर्गस्यापत्यं गा र
र्ग्यः ॥ वात्स्यः ॥ यञञोश्च ॥ ९ ॥ तयोर्लुक् स्यात् तत्कृते बहुत्वे न तु
स्त्रियाम् ॥ गर्गाः ॥ वत्साः ॥ नेत्येति किं ॥ प्रियगार्ग्याः ॥ स्त्रियां
त्तु गार्ग्यः स्त्रियः ॥ युवापत्ये तु फक् ॥ यञिञोश्च ॥ आपत्य
स्य च तद्धितेनाति ॥ आपत्यस्य यकारस्य तद्धिते परे लोपः स्या

त्वान्नत्वा कारे । गार्ग्यस्य युवापत्यं गार्ग्यायणः । गार्गेर्गा
र्ग्यस्य गार्ग्यायणस्य वापत्ये विवक्षिते एको गोत्र इति
नियमात् स्यात् प्रागुदेवयञ् । गार्ग्यः । गर्गस्य गार्गेर्गार्ग्य
स्य गार्ग्यायणस्य वा युवापत्य विवक्षायां गोत्राद्यून्य
स्त्रियामिति नियमात् । गार्ग्यपरादेव युवापत्यप्रत्ययः ।
गार्ग्यायणः । भ्रातरि च ज्यायसि । ज्येष्ठे भ्रातरि जीवति
कनीयान् युवसंज्ञः स्यात् । पित्रादौ मृते जीवति वाग्रजे ।
नुजो गार्ग्यायणः । बाह्वादिभ्यश्च । एभ्य इञ् स्यादपत्ये ।
बाहविः । औपबिन्दविः । न लक्षिते । औडुलोमिः । आग्निश
र्मिः । कथान्तरकङ्चाष्ठ यानरिञ् स्यादकङ्नदेशाख्यासौ

सा॰ धानर्कि। अक्सवहृकनि धारवंडालविंचातांचोष्ठिः। न
प्र॰कौ॰ याभ्यां पदां ताभ्यां पूर्वौ न ताभ्यामैच। पदान्ताभ्यां यका
रवकाराभ्यां परस्य न वृद्धिः। किं तु ताभ्यां पूर्वौ ऐचावाग
मौ क्रमात्ततः। वैयासकिः वानुकः किः। नैयादकिः॥ इत्या
25 दि। गोत्रे कुञ्जादिभ्यः च्फञ्। एभ्यो गोत्रार्थे च्फञ् स्यात्॥ प
व्रातच्फञोरस्त्रियां। व्रातवाचिभ्यः च्फञन्तेभ्यः स्वार्थे
ञ्यः स्यात्। न तु स्त्रियां। कौञ्जायन्यः। व्राभायन्यः। स्त्रियां
तु कौञ्जायनी। जातिगोत्रत्वेन जातित्वात् ङीष्। ञ्यादय
स्तद्राजाः। ञ्यादयः प्रत्ययाः तद्राजसंज्ञाः स्युः। तद्रा
जस्य बहुष्वतेनैवास्त्रियां। तद्राजस्य लुक् स्यात्तत्कृते बहु

त्येन तु स्त्रियां कौंजायनाः। अनन्तरापत्ये कौंजिः। नडादिभ्यः
फक्। एभ्यो गोत्रे फक् स्यात्। नाडायनः। चारायणः॥ आमु
ष्यायणः। अनंतरापत्ये नाडिः। शिवादिभ्योऽण्। एभ्यो
ऽपत्ये स्यादिञोऽपवादः। शैवः। ऋष्यंधकवृष्णिकुरुभ्यश्च
एभ्योऽण् स्यात् इञः। ऋषिभ्यः। वासिष्ठः। वैश्वामित्रः। अं
धकेभ्यः। श्वाफल्कः। रांधसः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः।
कुरुभ्यः। नाकुलः। साहदेवः। बाह्वादिभ्यश्च। बाहविः। आर्जुनि
श्च युधिष्ठिरि इत्यादय इञन्ताः। बाह्वादेराकृतिगणत्वात्।
गार्गिः। वैदिः। सौरिः। मातुरुत्संख्यासंभद्रपूर्वायाः। सं

सा॰
प्र॰ कौ॰
26

ख्यादिपूर्वाया मातुरपत्येऽण् स्यादुकारोऽन्तादेशश्च । द्वयो-
र्मात्रोरपत्यं द्वैमातुरः । सांमातुरः । भाद्रमातुरः । कन्यायाः
कनीन च । कन्याया अण् स्यात् कनीनादेशश्च । कानी-
नः । स्त्रीभ्यो ढक् । स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात् । ढस्येयादे-
शः । वैनतेयः । माहेयः । यौवतेयः । शुभ्रादिभ्यश्च । एभ्यो-
ऽपत्ये ढक् स्यात् । अविदुभ्य इति प्राप्तस्याणोऽपवा-
दः । शौभ्रेयः । गांगेयः । ढे लोपोऽकद्र्वाः । ढे परे ओर्लोपः स्यात् क-
द्रूं विना । कामंडलेयः । कद्र्वास्तु काद्रवेयः । पंगोस्तुन । पांगवेयः ।
इतश्चानिजः । इकारान्ताद्व्यचोऽनिजन्तादपत्ये ढक् स्यात् । नाविजेतार

आत्रेयः। नैतेयः। इतः किं। दाक्षिः। अस्मिजः किं। दाक्षायणः।
द्व्यचः किं। मारीचः। कल्याण्यादीनामिनङ्। एषामपत्ये
ढक् स्यादिनङादेशश्च। काल्याणिनेयः। जैयाष्ठिनेयः। हृ
द्भगसिन्ध्वन्ते पूर्वपदस्य च। हृदयान्ते शब्दे पूर्वोत्तरपदयोर्वृ
द्धिः स्यात्। सौहार्दं। सौभागिनेयः। साक्तुसैन्धवः। अनुश
तिकादीनां च। उभयपदवृद्धिः। आनुशातिकं। पारस्त्रैणेयः
कुलटाया वा। अस्या इनङादेशो वा स्यात्। ठकि। कौलटिने
यः। कौलटेयः। सतीभिक्षुकाकुलटया। चटकाया ऐरक्
चटकाया ऐरक् स्यादपत्ये। चटकादपीष्यते। चटकायाः च

व्या. टकस्य वापत्यं चाटकैरः। स्त्र्यपत्ये लुग्वाच्यः। स्यापत्यं च टका।
प्र. कौ. गोधाया ढ्रक्। अस्यापत्ये ढ्रक् स्यात्। ढस्येयः। लोपो व्योर्व
लि। गौधेरः। शुभ्रादित्वात् ढक्। गौधेयः। आरगुदीचां। गौधा
27 रः। आकारो बहुत्वादन्यत्रापि। नादेयः। नाडारः। क्षुद्राभ्यो
वा। शीलहीनाङ्गहीनाः क्षुद्राः। ततो वा ढ्रक्। कौलटेरः।
दासेरः। नाटेरः। काणेरः। यद्वा ढक्। पितृष्वसुश्छण्। अस्या
ष्वसुरस्यापत्ये। छस्य ईयः। पैतृष्वस्रीयः। ढकि लोपः।
पितृष्वसुरन्त्यलोपः स्याद् ढकि। अत एव ढक्। पैतृष्वसेयः।
मातृष्वसुश्च। मातृष्वस्रीयः। मातृष्वसेयः। राजश्वशुर

यत्। अस्मात् यत् स्यादपत्येर्थे। श्वशुर्यः। ये चाभावकर्म्म
णोः। यादौ तद्धिते अन् प्रकृत्या न तु भावकर्म्मणोः। राज्ञो
जातोपत्ये। राजन्यः। क्षत्रियः। राजनोन्यः। अनो अन् अ
णि प्रकृत्या स्यात्। इति टिलोपो न। अभावकर्म्मणोः
किं। राज्ञो भावः कर्म्म वा राज्यं। क्षत्राद्घः। घस्येयः। क्षत्रिय
जातावित्येव। क्षात्रिरन्यः। कुलात्खः। केवलात् कुलात् ख
खः स्यात्। खस्येनः। कुलीनः। अपूर्वपदा
दन्यतरस्यां यड्ढकञौ। केवलात् कुलात् यड्ढकञौ वा स्तः। पक्षे
खः। कुल्यः। कौलेयकः। कुलीनः। महाकुलादञ्खञौ। मा

व्या. स्मादेत्तौ वा स्तः पदे रवः। माहाकुलः। माहाकुलीनः। दुष्कुला

प्र-कौ. ड्ढकादौ दौष्कुलेयः पक्षे दुःकुलीनः। स्वसुश्छः। स्वस्रीयः।

भ्रातुर्व्यच्च। भ्रातुरपत्ये व्यत्स्यात्। भ्रातृव्यः। चकाराच्छः।

भ्रात्रीयः। व्यन्सपत्ने। भ्रातृव्यः। शत्रुः। स्वरे भेदः। रेव

28 त्यादिभ्यष्ठक्। रेवत्यादिभ्योऽपत्ये ठक् स्यात्। ठस्येकः॥

प्रत्ययादेष्ठस्येकादेशः स्यात्। रैवतिकः। आश्वपालिकः।

आनन्तर्ये विदादिभ्योऽञ्॥ विदादिभ्यो गोत्रापत्येऽ

ञ् स्यात्। ये त्वत्रानृषयस्तेभ्य आनन्तर्ये पुत्रादौ वैदः। गोत्रे वि

भज न्तस्याहुत्वे लुक्। विदाः। उर्वी। गोत्र इत्येव। वैदिः। अत्र

त्रिभ्यः पौत्रः। दौहित्रः। यस्कादिभ्यो गोत्रे। एभ्यो गोत्रप्रत्यय
स्य बहुषु लुक्। तत्कृते बहुत्वे न तु स्त्रियाम्। यस्काः। लह्याः।
अस्त्रियां किं। यास्काः स्त्रियः। अत्रिभृगुकुत्सवसिष्ठगोतमां
गिरोभ्यश्च। एभ्यस्तत्कृते। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः।
गोतमाः। अंगिरसः। तेनैतेत्येव। प्रियात्रेयाः। स्त्रियां तु आत्रा
वैय्यः स्त्रियः। जनपदशब्दात्क्षत्रियादञ्। जनपदशब्दात्क्ष
त्रियवाचिनोऽपत्येऽञ् स्यात्। पांचालः। वैदेहः। देशशब्दा
त्किं। पौरवः। क्षत्रियसमानशब्दाज्जनपदस्य राजन्यापत्य

वत्। पंचालानां राजा पांचालः। वैदेहः। आंगः। वांगः। ते तद्राजाः।
तेष्वजादयस्तद्राजसंज्ञाः स्युः। बहुत्वे तद्राजस्य लुक्। पं
चालाः। विदेहाः। अंगाः। वंगाः। कुमुदगंधेरपत्यं कौमुद
गंधः। वराहस्यापत्यं वाराहिः। स्त्र्यपत्ये तु। ह्रस्वं लघु। ह्रस्व
मक्षरं लघुसंज्ञं स्यात्। संयोगे गुरु। संयोगे परे ह्रस्वं गुरुसं
ज्ञं स्यात्। दीर्घं च। दीर्घं च गुरुसंज्ञं स्यात्। अणिञोरनार्ष
योर्गुरूपोत्तमयोः ष्यङ् गोत्रे। त्र्यादीनामंत्यमुत्तमं तस्य स
मीपमुपोत्तमं गुरूपोत्तमयोरनार्षयोर्गोत्रे स्त्रियां यावणिञौ

विहितौतयोः ष्वङादेशः स्यात्। षङ्गा विनो यङ् ष्वाप। कौ
रुदगं ष्या चारायुण्या नाध्यो। किंवासिष्ठो। वैश्वामित्री।
अश्वपत्यादिभ्यश्च। एभ्यः प्राग्दीव्यतीये ष्वपत्यार्थे ष्वस्या
त्। रायस्यापवादः। आश्वपत। गाणपत। दित्यदित्या दित्यप
त्युत्तरपदाण्यः। दित्यादिभ्यः पत्यंताच्च प्राग्दीव्यतीयार्थेषु
ण्यः स्यात्। दैत्यः। आदित्यः। हलोयमायमिलोप इति वि
यकारलोपः। आदित्यं हविः। प्राजापत्यं। सेनापत्यं। यमाच्चे
ति। याम्यं। देवस्य यञ्चौ। दैव्यं। दैवं। विहि बह्हि लोपोव ण
वा। वाह्यः। ईकक्। वाहीकः। दिने ङीप्यिकाने स्त्रीभ्योढक्।

मा. तेनदैनेयः सिध्येतः । दुक्षादिभ्यो ढञ् । कौक्षं स्त्रीपुंसाभ्यां
प्र.कौ. नञ्स्नञौ भवनात् । धान्यानां भवने । त्यतः प्रागर्थेषु स्त्री
पुंसाभ्यां क्रमात् नञ्स्नञौ स्तः । स्त्रीषु भवः स्त्रैणः । पौंस्नः ।
30 एवं समूहहितागतादिषु स्त्रीपुंवच्चेति ज्ञापकाद्वत्यर्थे न ।
स्त्रीवत्पुंवत् । तेन रक्तं रागात् । तृतीयासमर्था द्राग
वाचिनो रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात् ।
ऽण्यण् । कषायेण रक्तः । काषायः पटः । लाक्षारो
चनाशकलकर्दमाट्ठक् । अस्मात् ठक् पर्येठक स्यात् । अण
पवादः । लाक्षिक इत्यादि । नक्षत्रेण युक्तः कालः । तृतीयांता

ने दत्त्वा चिन्तो भुक्तः इत्यर्थे यथाख्यं प्रत्ययः स्यात्। पोभु
क्तः सकालः श्रो। भुक्ते एवं भुक्ता पौषी रात्रिः। लुप् विशेषे।
कालस्य अविशेषे प्रत्ययस्य लुप् स्यात्। अद्य पुष्यः। दृ
ष्टं साम्। तत्री पांतात् दृष्टमित्यर्थे यथाख्यं प्रत्ययः
स्यात्। यद्दृष्टं साम चेत्। वासिष्ठेन दृष्टं वासिष्ठं सा
म। परिवृत्तो रथः। वस्त्रेण परिवृत्तो रथो वास्त्रः रथः।
पांडुकंबलादिनिः। पांडुकंबली रथः। तत्रोद्धृतममत्रेभ्यः। स
प्तम्यंतेभ्यो ऽमत्रेभ्य उद्धृतेर्थे यथाख्यं प्रत्ययः स्यात्। शरा
वे उद्धृत ओदनः शारावः। भुक्तोच्छिष्ट इत्यर्थः। संस्कृतं भक्षाः।

व्या. भ्राष्ट्रेषुसंस्कृताभक्ष्याः।सास्मिन्पौर्णमासीतिसं
प्र.कौ. ज्ञायां।पौषीपौर्णमासीसास्मिन्पौषोमासः॥
सास्यदेवता।देवतावाचिनःप्रथमांतात्षष्ठ्यर्थेयथा
(31) विहितंप्रत्ययःस्यात्।इन्द्रोदेवतास्येत्यैन्द्रंहविः।
पाशुपतं।बार्हस्पत्यं।कस्येत्।कशब्दात्यप्रत्ययःस्याद्प्र
त्ययःस्यादिकारोंतादेशः।ब्रह्मायादेशश्चकोदेवता
स्येतिकायंहविः।शुक्राद्घन्।शुक्रियम्।सोमाट्ट्यण्।
सौम्यं।टित्वात्सौमीऋक्।वाय्वृतुपित्रुषसोयत्।ए
भ्योयत्स्यात्।ड्हेतौयौ।ओर्गुणः।वांतोयिप्रत्यये।वायव्यं।

ऋतश्च्वां रीङ्ः ऋतः। अकृद्यकारे सार्वधातुके यकारे च्वौ
च परे ऋदन्तरीङादेशः स्यात्। पित्र्यं। ऊ च स्यां। अग्नेर्ढक्।
आग्नेयं। देवता द्वंद्वे वा। अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः
स्यात् ञिदादौ परे। आग्निमारुतौ देवते अस्येति आग्निमारु
तं रुठकं हविः। स्वामिन्येतन्न। नेह। स्कांदविशाखः। नेन्द्र
स्य परस्य। पुरस्य। इन्द्रस्य वृद्धिर्न सोमेन्द्रः। परस्य किं। ऐन्द्राग्नः।
दीर्घाच्च वरुणस्य। दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्राव
रुणं। मैत्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीं। तस्य
समूहः। षष्ठ्यन्तात्समूहार्थे यथास्वमणादयः स्युः। काक

सा. प्र. कौ.

32

तं सम्बद्धः काकं । भिक्षादिभ्योऽण् । एभ्योऽण् स्यात् । ठक्रोर्यो
ठकाद्यपवादः । भैक्षं । यौवतं । भस्याढे तद्धित इति पुंवद्भा
वः । युवतिपाकस्मात्पर्याप्ता । गोत्रोक्षोष्ट्रोरभ्रराजराजन्य
राजपुत्रवत्समनुष्याजाद्वुञ् । अत्रापत्यमात्रं गोत्रं । अ
पत्यार्थे वा धकप्रकरणान्त । अपत्यार्थे प्रत्ययान्ताद्
तादिभ्यश्च स्यान्न त्वव वुञिति । औपगवकं । दाक्षकं । गा
र्गकं । आपत्यस्येति यलोपः । औक्षकं । नस्य भस्य टेर्लोपः
स्यात् । वाद्रकं । केदाराच्च । उक्रोर्यो चकाराद्वुञ् । युवोरना
नाकौ । युवः इत्येतयोः क्रमादनक इत्येतौ स्तः । कैदारकं

कैदार्य्यं। अनुनासिकयोरिष्टः। नेह ऊर्म्यायुः। माणिकाया
पञ्चाया। माणिक्यं। ठञ्कवचिनश्च। कवचिनः केकेदार
ञ्च वञ्स्यात्। उक्तेष्वर्थे। कावचिकं। केदारिकं। ब्राह्मणमा
णवबाडवाद्यत्। ब्राह्मण्यं। माणव्यं। बाडव्यं। ग्रामजन
बंधुसहायेभ्यस्तल्। एभ्यस्तल् स्यात्समूहार्थे। तलंतस्त्री
लिंगं। ग्रामता। जनतेत्यादि। गजाद्वेष्टः। गजता। अचित्तहस्ति
धेनोष्ठक्। अचित्तार्थेभ्यो हस्तिधेनुभ्यां च ठक् स्यात्। आ
पूपिकं। हास्तिकं। इसुसुक्तांतात्कः। इसउसउक्तकारान्त्य
स्य ठस्य कः स्यात्। धैनुकं। पाशादिभ्यो यः। पाश्या। वा
त्या। ऊलोपि। वातूलः। खलगोरथात्। यः प्रत्ययः। खलि

त्रा

वा॰ गव्या। रथ्या। इति त्रिकं यच प्राग्। खलगोरथेभ्यः। तेत्र
प्र॰कौ॰ णात्स्युः। खलिनी। गोत्रा। रथकट्या। तदस्यां प्रहर
णमिति क्रीडायां णः। प्रहरणार्थ्यात्स्यप्यमात्त्रान्स त्र
स्यर्थे क्रीडायां णः। दण्ड प्रहरणमस्यां क्रीडायां दा
33 ण्डा। मौष्टा। घञः सास्यां क्रियेति ञः। घञन्ता त्क्रि
कारक एवां क्रिया यां प्यन्नि स्यप्यमेना दस्यामिति स्यर्थे
ञः स्यात्। श्येनतिलस्य पाते ञे। ञप्रत्यये पाते
परे श्येनतिलयोर्मुमागमः स्यात्। श्येनंपा
तोस्यामिति श्यैनंपाता मृगया। तैलंपाता स्वधा

दण्डं यातीति त्रि० । तद धीते तद्वेदा द्वितीयासमर्थात्तदधीते तद्वे
देत्यर्थयोर्थ्यासमाणाद यः स्यु० । ऐ जागमः । व्याकरणम
धीते वेद वा वैयाकरणः । सौवश्वः इतिहासपुराणाभ्यां ठग्वा
च्यः । ऐतिहासिकः । पौराणिकः । क्रमादिभ्यो वुन् क्रमकः ।
पदकः । मीमांसकः । तदस्मिन्नस्तीति देशे तन्नाम्नि । प्रथमा
समर्थादस्त्युपाधिकात्सप्तम्यर्थे प्रत्यययात्तेनतं नाम्नि दे
शे वाच्ये यथाविमणाद यः स्युः । उदुंबराणि संत्यस्मिन्दे
शे औदुंबरः । तेन निर्वृत्तं । कुशांबेन निर्वृत्ता कौशांबी नगरी
तदस्य निवासः । ष ष्ठ्यन्तान्निवासे देशे तन्नाम्नि वाच्ये यथाणा

मा. दृषः स्मृः। शिवीनां निवासो देशः शैवः। अदूरभवश्च। प
प्र.कौ श्चत्वाद दूरभवे देशे तन्नाम्नि वाच्ये अण्। दृषः स्मृः
विदिशाया अदूरभवं नगरं वैदिशं। जनपदे लुप्। जनप
